## तृतीयः पाठः

# अस्माकं परिवेशः



इदं क्रीडाक्षेत्रम् अस्ति। बालकाः कन्दुकेन खेलन्ति। केचिद् बालकाः वेगेन धावन्ति। वयं नेत्राभ्याम् बालकान् पश्यामः। बालकाः सहचरैः सह क्रीडन्ति। अत्र बालिकाः अपि उत्साहेनक्रीडन्ति।



विद्यालयाः शिक्षायै भवन्ति। छात्राः पठनाय विद्यालयं गच्छन्ति। वयमपि पठनाय विद्यालयं गच्छामः। यूयमपि विद्यार्जनाय तत्र गच्छथ। ते च ताः च अध्ययनाय एव विद्यालयं गच्छन्ति। सा पुस्तिकाभ्यः पुस्तकालयं गच्छति।



इदम् उपवनं ग्रामात् बहिः अस्ति। जनाः गृहेभ्यः अत्र आगच्छन्ति। उपवनरक्षकः कूपात् जलम् आनयति। सः जलेन वृक्षान् च सिञ्चति। यदा फलानि पक्वानि भवन्ति तदा तानि वृक्षेभ्यः पतन्ति। सः उपवनात् फलानि आपणं नयति। जनाः तानि आपणात् गृहं नयन्ति।



इदम् एकं सुन्दरम् उद्यानम् अस्ति। यदा प्रातः सूर्यस्य प्रकाशः भवति, तदा प्रकाशेन उद्यानस्य शोभा भवति। भ्रमराः कुसुमानाम् उपरि गुञ्जन्ति। कोकिलाः वृक्षाणाम् उपरि कूजन्ति। संजीवस्य माता उद्यानं रक्षति पादपान् सिंचति च।



प्रातःकाले वयम् उद्यानं गच्छामः। उद्याने जनाः विचरन्ति। उद्याने वटः आम्रः निम्बः अश्वत्थः अन्ये च अपि वृक्षाः सन्ति। खगाः वृक्षेषु निवसन्ति। वृक्षेषु पक्वानि फलानि सन्ति। लतासु कुसुमानि विकसन्ति। उद्याने एकः तडागः अपि अस्ति। जले कमलानि विकसन्ति।

कमलेषु भ्रमराः गुंजन्ति। तडागे मत्स्याः अपि सन्ति। सायंकाले बालकाः बालिकाः च उद्याने क्रीडन्ति। सम्प्रति वायु-प्रदूषणस्य दूरीकरणाय नगरे उद्यानम् आवश्यकम्।

शब्दार्थः

**क्रीडाक्षेत्रम्** = खेल का मैदान। **वेगेन** = तेज गति से। **सहचरैः सह** = मित्रों के साथ। **उत्साहेन** = खुशी से। **शिक्षायै** = शिक्षा के लिए। **आपणम्** = बाजार। **बहिः** = बाहर। **पक्वानि** = पके हुए। **कोकिलाः** = कोयलें। **पादपान्** = पौधों को। **सिंचति** = सींचती है। **तडागः** = तालाब। **भ्रमराः** = भँवरे। **गुंजन्ति** = गूँजते हैं। **सम्प्रति** = इस समय। **अश्वत्थः** = पीपल का वृक्ष। **वट** = बरगद। **निम्बः** = नीम।

## अभ्यासः

1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

क्रीडाक्षेत्रम् ,शिक्षायै, गुंजनम्,उत्साहेन ,पुस्तिकाभ्यः ,अश्वत्थः,कुसुमानाम्, वृक्षेषु ,कूपात्, शिक्षायै, नेत्राभ्याम्

**2. एकपदेन उत्तरत-**

(क) बालकाः केन क्रीडन्ति?

(ख) छात्राः किमर्थं विद्यालयं गच्छन्ति ?

(ग) फलानि केभ्यः पतन्ति?

(घ) प्रातः कस्य प्रकाशः भवति?

(ङ) भ्रमराः कुत्र गुजन्ति। ?

**3 . मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-**

(क) वयं बालकान् ........................ पश्यामः।

(ख) विद्यालयाः .......................... भवन्ति।

(ग) उपवनरक्षकः.......................... जलम् आनयति।

(घ) भ्रमराः.......................... उपरि गुजन्ति।।

(ङ) खगाः .......................... निवसन्ति।

4. **विभक्तिं वचनं च लिखत-**

विभक्तिम् वचनम्

यथा- शिक्षायै चतुर्थी एकवचनम्

(क पुस्तिकाभ्यः .................. ................

(ख) वृक्षेषु ................. ...............

(ग) कुसुमानाम् ................ ...............

(घ) कन्दुकेन ................ ...............

(ङ) सहचरैः ................ ...............

**5. कोष्ठकात् उचितपदानि चित्वा वाक्यानि पूरयत-**

(क) वयं ...... चित्राणि पश्यामः। (नेत्राभ्याम्/नेत्रेण)

(ख) ते ........ विद्यालयं गच्छन्ति (शिक्षाभ्यः/शिक्षायै) .

(ग) जनाः .... आपणं आगच्छन्ति। (गृहेण/गृहात्)

(घ) भ्रमराः .........उपरि गुञ्जन्ति। (पुष्पेभ्यः/पुष्पाणाम्)

(ङ) ................................ पक्वानि फलानि सन्ति। (वृक्षेषु/वृक्षेण)

**6. रेखांकितशब्दानाम् विलोमं मञ्जूषायां लिखत-**

यथा- अत्र बालकाः दुःखेन धावन्ति।

(क) बालिकाः अपि उत्साहेन क्रीडन्ति।

(ख) बालकः मन्दस्वरेण गीतं गायति।

(ग) प्रातःकाले वयं उद्यानं गच्छामः।

**विशेष-** सह (साथ) पद के पहले 'तृतीया-विभक्ति' का प्रयोग होता है- सहचरैः सह खेलति।

-देने अर्थ में जिसे दिया जाये, उसमें 'चतुर्थी विभक्ति' होती है- छात्राय ज्ञानं ददाति।

- अलगाव में जो स्थिर रहे, उसमें 'पञ्चमी विभक्ति' होती है- वृक्षात् पत्राणि पतन्ति।

**शिक्षण-सङ्केतः**

क. पाठस्य अनुच्छेदानां छात्रैः पृथक्-पृथक् वाचनं कारयत।

ख. विभक्तयः, कारकाणि च परिशिष्टे भागे सन्ति, तेषाम् अभ्यासं कारयत।

ग. बालक शब्दस्य पठ् धातोः च रूपाणि परिशिष्टात् लेखयत।

**स्मरणीयम्-**

*आज्ञां मानय*

*आज्ञां मानय मान्य-जनानाम्*

*आज्ञां मानय पूज्य-जनानाम्।*

*आज्ञां मानय ज्येष्ठ-जनानाम्*

*आज्ञां मानय श्रेष्ठ-जनानाम्।*

*न कुरु विलम्बम्*

*न कुरु विलम्बं शौचे स्नाने*

*न कुरु विलम्बं भोजन-पाने।*

*न कुरु विलम्बं उषसि विहरणे*

*न कुरु विलम्बं विद्याग्रहणे।।*

*अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।*